क्र.नं.30 व्याकरण 1645

७८ /व्या ७६

# प्रौढमनोरमा

राजवाडे संशोधन मंदिर
क्रमांक 30
हस्तलिखित ग्रंथ संग्रह.

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(१)

ढोढमौरगा ।

श्री. रा. राजवाडे संशोधन मंदिर
क्रमांक 30
हस्त लिखित ग्रंथ संग्रह.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(२)

कौ॰ टी॰ श्रीगणेशायनमः॥ श्रीगुरुचरणकमलाभ्यांनमः॥ ध्यायंध्यायंपरंब्रह्मस्मारंस्मा म-नो-म
॥१॥ रंगुरोर्गिरः। सिद्धांतकौमुदीमाख्यां कुर्मः प्रौढमनोरमाम्॥१॥ हयवरट्। हकारो
पदेशः अट् अशहश् इण् ग्रहणेषु ग्रहणार्थः। अर्हेण। अड्व्यवायेपीतिणत्वं। देवाह
संति। भोभगोरितिरोर्यत्वं। देवोहसती। हसितेत्यत्र। लिलिहिढ्वे। लिलि॰ हिध्वे
विभाषेतिवाढः। हल्॥ इदंसूत्रंवलुरल् झलुशल्षु हकारग्रहणार्थम्॥ रुदिहि। स्वपिहि।
रुदादिभ्यः सार्वधातुक इतिवलादिलक्षणइट्। स्निहित्वा। स्नेहित्वा। रलोव्युपधादितिवाकि
त्वं। अदाग्धां। झलोझलीतिसकारलोपः। अलिक्षत्। शल इगुपधादनिटक्सः। हलंत्यं॥
सूत्रेंत्यमिति। हलि अंत्यमितिविग्रहे सप्तमीति योगविभागात्सुप् सुपेतिवासमासे। इतिभा ॥१॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

वः। यद्वा षष्ठीतत्पुरुषोयम्। स्योरेतत्। हल्ङ्यिपि केदेशस्यैव तंत्रा वृत्त्येकशेषान्यतममस्तु। हस्य
ऽऽ इति च आख्यास्यते सामीप्यं षष्ठ्यर्थः। यद्वा मास्तु तंत्रादि अस्तु समाहारद्वंद्वः। हल्ङ्च ङ्चे
ति ङकारस्य संयोगांत लोपः इति चेन्नैवं। आद्ये समासस्याक्लिष्टत्वात्। नहि ब्राह्मणकंबल
इत्यादौ ब्राह्मणसमीपवर्ति अन्यदीयः कंबलः प्रतीयते। न वा चित्रगुशब्दाच्चित्रगवीणां स
मीपवर्ति वृक्षादिः प्रतीयते अत एव अनंतरादिषु न समासोऽनभिधानादिति स्पष्टमाकरे।
किं बहुना ब्राह्मणस्य कंबलः। चित्रा गावो यस्येति समस्तव्यस्तयो र्गोपित्वानिष्टः। द्वितीयेपि संयोगां
तलोपो दुर्लभः। यणः प्रतिषेधारंभात्। तत्प्रसारण्यानपक्षेपि झलो झलि इत्यतो झलि ग्रहणमपकृ
ष्य संयोगांतस्य झलो लोपविधानाच्च। किंच। पदार्थबोधं विना वाक्यार्थबोधासंभवेन

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)

कौ॰ टी॰ हल्प्रत्याहारसिद्धेः प्रागेव तत्सूत्रार्थबोधे प्रसक्ते तदुद्धारार्थोऽयं प्रयत्नः। अस्यां चावस्थायां नरमा
॥२॥ पांहल्शब्दार्थासिद्धौ ढं ढं एवरु ऋभिः सह विवक्षाया असंभवात्। तस्माद्यथोक्तमेवन्याय्यम्। मध्यगानामिति। आद्यंताभ्यां अवयवाभ्यां अवयवीसमुदाय आक्षिप्यते तस्य च युगपल्लक्ष्ये प्रयोगाभावात्। तदवयवेषु वर्तमाना संज्ञा मध्यमेषु विश्राम्यति न त्वाद्यंतयोः संज्ञास्वरूपांतरभावेन तयोः पारार्थ्यनिर्णयादिति भावः। स्वस्य चेति। स्वंरूपमित्यनुवृत्तेः। स्वंरूपं चोद्देरेव गृह्यते नान्यस्य अपेनेत्यप्रधानतनीपानिर्देशात् सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शित्वात्॥ आद्योच्चारणमिति। यद्यपि उपदिश्यते अनेनेति करणव्युत्पत्त्या शास्त्रमुपदेश इति भाष्यवृत्त्यादिषु व्याख्यातं तथापि तत्रो ॥२॥

(3A)

डीवादमात्रपरं। करणेघञोदुर्लभत्वात्। ल्युटा वा धातू। नचघः। असंज्ञात्वात् प्राये
णसंज्ञायामिति व्याख्यानस्याक्लिष्टत्वात्। नह्युपाधेरुपाधिर्भवति इत्यादिना अव
[illegible]हेतुनात्र। अतएव घापवादोद्रुश्रय इति घञपीह न बाहुलकं अगतिक
गतिः। अतएव प्रक्रियेयं शक्यापाभिर्ररीतिकरणमुसत्वात्तिरपि परास्तोत थाच वा
र्तिकं। अजस्त्रीखलुनास्त्रियां खलुनो विप्रतिषेधेनेति। अतो भावे प्रत्यय एवान्या
य्य इति भावः यत्तु धातुसूत्रेत्यादिकं पठंति यच्चम्याच्च क्षिते करणव्युत्पत्या पूर्वो धौ पात्रा
नां उपदेशत्वं कर्मव्युत्पत्याऽऽगमादीनाम्। उणादिलिंगानुशासनयोरपि सूत्रत्वात् सि
द्धेः पंगुपादानं गोबलीवर्दन्यायेन। एवं गणत्वादि च सिद्धं धातोरपीत्यादि। अत्रेदं वक्त

A project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(4)

कौ॰ टी॰ग्र॥ किमेषामुपदेशसंज्ञा उतयोगमात्रं॥ नाद्यः संज्ञायाः शास्त्रकारैरनुक्तेः॥ असंभ॰र॰मा
॥३॥ ज्ञानात् घप्रत्ययो नेति भाष्योक्तेश्च॥ अस्मदादिकृतसंज्ञायाः शास्त्रव्यवस्थापकत्वे
अतिप्रसंगाच्च॥ अमोऽभिव्यमदंतत्वादितिस्वपरग्रंथविरोधाच्च॥ नह्युत्सृष्टानुबंधस्य
आमो नप्रत्ययत्वं येन भिन्नं भवेदिति॥ किंचैवंप्रत्ययविधौ पंचम्याः षष्ठीप्रकल्पकत्वे सनुःसने
वादेशोऽस्त्वित्याशंक्य उपदेशाभावादित्संज्ञा न स्यादिति भाष्यकैयटोक्तं आकुप्येत॥
किंच न [illegible] धातुलोपइतिसूत्रे धातुग्रहणं किं? सूत्र लविता पज्पविला इति भाष्यम्॥ उपदे
शएव अनुबंधलोपे कृते नतनो धातुसंज्ञा। एवं परः कैयटग्रंथश्च विरुध्येत॥ अपिचध्व
सोरेद्धावितिसूत्रे लोपश्चे द्विशकारकोनिर्देशः द्वितीयः शकारइदिति अलोऽन्त्यात्सूत्र ॥३॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(4A)

स्यंभाष्येकैय्यटादिकमपिविरुध्येत॥ अपिचध्वसोरेद्धावितिनद्वितीयः॥ योगस्यैवपुर
स्कारपरिगणनस्यव्यर्थत्वात्॥ धात्वादिषुकरणन्नसन्तिः आगमादिषुनेतिवैषम्यस्यदुरू
पपादत्वाच्च॥ उपदेशत्वाप्रयोजकधातुत्वादिरूपोपाध्यवच्छिन्नसमुदायांत्येहलित्यादित्य
र्थइतिस्वयंग्रंथविरोधाच्च॥ पक्षद्वयेपिलिंगानुशासनस्यप्रकृतानुपयोगात्॥ ओपध्येति
शकारस्यासंग्रहाच्च॥ आदेचउपदेशेउपदेशत्वाइत्यादौ आयावारणस्यैवोपदेशपद
र्थतायाः सर्वसंमतत्वाच्चेतिदिक्॥ उपदेशेऽजनुनासिकइत्॥ यद्यप्यत्रोपजीव्यत्वा
दनुनासिकसंज्ञाप्रथमंवक्तुमुचितातथापिनासिकामनुगइतियोगाश्रयणेनैव
गतार्थत्वादनुनासिकसंज्ञासूत्रंमंदप्रयोजनमितिध्वनयितुंनेहोपन्यस्तं॥ ६

Joint project of the Rajwade Sanshodhan Mandal, Dhule and ... Mumbai

(5)

कौ॰ टी॰ उपदेशे किं॥ अभ्रऑ अपः॥ यद्यपीह उत्तरः उँ इत्यत्रैव विधानसामर्थ्यान्नेत्वमिसुवचम्॥ म॰ मा॰
॥४॥ तथापि उत्तरार्थमवश्यं कर्तव्ये उपदेशग्रहणं स्पष्टप्रतिपत्तये इहैव कृतम्॥ अच्च किम्॥
मनिनोमकास्यमाभूत्॥ प्रतिज्ञायत इति प्रतिज्ञा॥ आतश्चोपसर्ग इति कर्मण्यङ्॥
प्रतिज्ञा अनुनासिक्यं एषामिति विग्रहः॥ एवं च प्रतिज्ञासमधिगम्यं प्रतिज्ञाशब्दस्य
लक्षणे इति क्लिष्टव्याख्यानं नाश्रयणीयं॥ पाणिन्युपज्ञाम्याकरणमित्यादिष्विव लक्ष
णां विनैव निर्वाहात्॥ यद्यपि सूत्रकारकृतोऽनुनासिकपाठ इदानीं परिभ्रष्टस्तथा
पि वार्त्तिकारादिव्यवहारबलेन यथा कार्यं प्राक्स्थित इत्यनुमीयत इति भावः॥ ननु रल
योरितिन्यूनम्॥ टकारस्यापि मध्यगत्वादित्यत आह॥ प्रत्याहारेष्वितामिति॥ न्यवहि्रयंत

॥४॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

इति॥२ प्रत्याह्रियंते संक्षिप्यंते वर्णा यत्रेति बाहुलकात् अधिकरणे घञ्॥ ५ यद्यपि योगमात्रयकारा
दिसंज्ञास्वतिप्रसक्तं तथापि योगरूढिरिति भावः॥ प्रत्याहाराश्चैकचत्वारिंशदिति प्राचः॥
चतुर्दशसूत्रीस्थैर्हल्भिरिद्भिः कृता अष्टाध्याय्यां व्यवहृता एकचत्वारिंशदिति तस्यार्थः॥ तेन
सुप्तिङादीनां प्रत्याहारस्य च यो द्वितीया इति वार्तिकस्य च यॢ प्रत्याहारस्याधिक्येप्यदोषः॥ यत्तु
त्रमंताड्डु इति यमि त्रैमिते ष्वानिडेकाच्इष्यत इति च अम् वार्तिककृता व्यवहृत इत्याहुः॥ तद्भ
साभिधानम्॥ आद्यस्योणादिसूत्रस्थत्वात्॥ द्वितीयस्य तु व्याघ्रभूतिकारिकास्थत्वादित्या
स्तांतावत्॥ एष च संख्यानियमो नातीवोपयुज्यत इत्युपेक्षितः पक्षः॥ ऊकालोऽच्॥
ह्रस्वदीर्घप्लुत इति समाहारद्वंद्वः सौत्रं पुंस्त्वं॥ वां कालः इवेति॥ फलितार्थकथनमिदं विग्र

Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(६)

कौ॰ टी॰ विग्रहस्तु वः कालो यस्येति बोध्यः॥ ऊ शब्देन स्वोच्चारणकालो लक्ष्यते॥ आयइति॥ निपाता आद्यु म॰ मा॰
॥५॥ दात्ता इत्याकार उदात्तः पच्छद्धस्तु फिट्स्वरेण॥ अर्वाङ्इति॥ अकारोनुदात्तः॥ तस्यादित्तः॥
अतं ग्रमिति॥ उपेयिवानित्यत्र उपसर्ग इव अविवक्षितामित्यर्थः॥ ननु ईयिवांसमासीरस्विधइ
त्यादिप्रयोगदर्शनादविवक्षास्तु॥ इह तु अविवक्षायां प्रमाणं किमिति चेत् लक्ष्यदर्शनं प्रातिशाख्यादिकं चेति गृहाण॥ तथाहि ये अराइत्यत्र एकारः तनूनपाच्छचीपतिमित्यत्र पदपाठे
उदात्तौ चाधोदात्तोइतिसकलवन्हृचप्रसिद्धम्॥ तनूनपाच्छचीपतिशब्दयोः उभेवनस्पत्या
दिषु युगपदिति पूर्वोत्तरपदयोराद्युदात्तत्वे कृते अनुदात्तं पदमेकवर्जमिति शेषनिघातः
पूर्वपदभूतयोस्तनूनपाच्छची॰ एतयो रंत्यस्य पाक्षिकं स्वरितत्वं प्रातिशाख्येउ ॥५॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

(6A)

ऋं ॥ जात्यवद्वानथावांतो ननु शचीतिपूर्वयोरिति ॥ तथा स्वरितार्धस्य उदात्तत्वे प्राप्ति
शाख्यमपि ॥ एकाक्षरसमावेशे पूर्वयोः स्वरितः स्वरः तस्योदात्ततरोदात्तादर्धमा
त्रार्धमेव वा ॥ अनुदात्तः परः शेषः स उदात्तश्रुतिर्न चेत् ॥ उदात्तं नोच्यते किंचित्स्वरितं वाक्ष
रं परम् ॥ अस्यार्थः पूर्वयोरुदात्तानुदात्तयोः एकत्र समावेशे सति स्वरितो बोध्यः
॥ तस्य स्वरितस्य स्वतंत्रोदात्तापेक्षया उदात्ततरार्धमात्रा बोध्याति ॥ क्वावो श्वाइत्या
दि ह्रस्वाभिप्राय अर्धं वेति दीर्घाभिप्रायम् ॥ अनेनैव ह्रस्वस्यापि संग्रहात् व्यापक
त्वादिदमेवादृतमिं इति सूचयितुमेवकारः ॥ अनुदात्त इत्यादि परिशेषसिद्धार्थकथनं
॥ सशेष उदात्तश्रुतिः स्यात् ॥ किमविशेषेणेत्याह ॥ न चेदित्यादि ॥ उदात्तस्वरितपरं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

को· टी· विदायेत्यर्थः॥ शाकल्योप्याह॥ अप्राकृतस्तु यस्वरः स्वरितोदात्तपूर्वगः॥ उदात्तायार्द्धमस्याथशि म·मा·
॥६॥ षंनिघ्नंनिकंपितमिति॥ उदात्तायउदात्तंकला॥ अर्धह्रस्वशब्देन अर्धमात्रोऽभ्यते इ
ति ह्रस्वदत्तादिग्रंथास्तु मतांतरपरतयाकथंचिन्नेया॥ क्रेति॥ किमोत्र॥ तित्स्वरितं॥
नइति॥ अनुदात्तंसर्वमपादादाविति मापधिकारादनुदात्तं॥ अभ्याइति॥ अशोः क्रानिनि
नित्स्वरेणाद्युदात्तं संहितायां लिके ह्रशउदात्ते नोदात्तइत्योकारउदात्तः॥ ये अराइति॥
द्वयमापिफिह्रस्वत्रेणांतोदात्त॥ एकादेशास्तुपक्षेस्वरितः॥ स्वरितोवानुदात्तेपदादावित्यु
क्तेः॥ मुखंचनासिकाचेति विग्रहे प्राण्यंगादेकवद्भावे मुखनासिकमिति स्यादत
आह॥ मुखसहितेति॥ तुल्यास्य॥ आस्ये भवमास्यं शरीरावयवाच्चदित्यसाभे ॥६॥

(7A)

प्रत्याह॥ नाल्वादीति॥ अभ्यंतरेति॥ एतच्च प्रशब्देन लभ्यते॥ तुल्यास्यं किं॥ तसा
अत्र पकारस्य नकारे परे झरोझरीति लोपो माभूत्॥ प्रयानग्रहणं किम्॥ वाक्श्चो
तति॥ शस्य लोपो न॥ ञमङ्णनानामिति॥ नासिकाचेति चकारेण स्वस्ववर्गान्त्य कु
ऌनाल्वादि समुच्चीयते॥ ऐदेतोरित्यारो तपरत्वमसंदेहार्थं ननु मत्का उग्रह
णार्थं॥ तेन प्लुतस्यापि संग्रहः॥ पूर्वत्रासिद्धम्॥ यद्ययं स्वतंत्रो विधिः स्यात्॥ तर्हि त्रिपादी
पूर्वं प्रत्यासिद्धा॥ इत्येव लभ्येत॥ त्रैपादिकं तु पूर्वं प्रति परं नासिद्धं स्यादत आह॥ अधिकारोय
मिति॥ यद्यत्र कार्यासिद्धत्वमिष्यते तर्हि पूर्वत्रासिद्धमिति मनोरथ इत्यादौ उत्वं न स्यात्॥
परत्वात् रोरीत्यस्य प्रसंगात्॥ तथाच पूर्वत्रासिद्धे नास्ति विप्रतिषेधो भावादुरस्येति सिद्धां
तो भाकुप्येत॥ अमू अमीत्यादेच नासिध्येत् अत आह॥ त्रिपादीति॥ परं शास्त्रमिति च॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(४)

कौ· टी· एतेनात्रिपाद्यांविहितंकार्यमसिद्धमित्यादिप्राचोग्रंथः परास्तः॥ विद्वण्वनेकंठमिति॥ विवारएषांप्र म· मा·
॥७॥ यत्नइति भावः॥ वर्गयमगाइति॥ वर्गगायमगाश्चेत्यर्थः॥ कादयइति॥ ळोकप्रासिद्धपाठोपे
क्षामिदम्॥ चतुर्दशस्त्र्यामवसानस्योत्तायोगात्॥ अर्धविसर्गेति॥ सादृश्यमुच्चारे ळेखनेचबो
ध्यम्॥ ऋॡवर्णयोरिति॥ आच चरोळोमोचनौवर्णौ चेतिविग्रहः॥ उश्चाउळ्चरळोःत
योर्वर्णयोरितिवा॥ प्रथमांतेनपरिनिष्ठितविभक्त्यावाविग्रहइतिसिद्धांतात्॥ ऋस्यक
इतिप्रकृतिभावः॥ नाइच्छक्लौ॥ आकारसहितइति॥ अचकालसमयवेळास्वित्यादिनि
र्देशः प्रश्लेषलिंगं॥ नचैवमपिपियपासोइत्यादौगुरुत्वनइतिप्लुतादाकारात्सरस्यसनः
सस्यषत्वंस्यात् एवेतिवाच्यम्॥ आश्च आश्चेतिद्वंद्वे सवर्णदीर्घेणदीर्घसरत्रप्लुतापि॥७॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8A)

प्रश्लिष्यत इति माख्यानात्॥ यणादिकामिति॥ शील शब्दः सवर्णदीर्घ आदि शब्दार्थः॥ अत्रे

ति॥ अत्रैवेत्यर्थः॥ पयपीति॥ ग्रहणक शास्त्रस्याप्राप्यानिष्पत्तेः इति भावः॥ हृ इत्युपल

क्षणं रमास्वित्यत्र षत्वं वा गा शीत्यत्र झयो ह इत्यत्राकारस्य घकारः॥ द्वासीष्टेत्यादौ दोषो द्वेरिति

घत्वं च नेति बोध्यम्॥ यद्विलुविवृतम् भ्रणामित्यत्र इ षद्विवृतमनुवर्त्य स्वराणां चेत्यत्र प्रयत्नभे

दो व्याख्यायतेन तदानाइझाऊवितिसूत्रे भाष्ये स्थितम्॥ दाढिरोदेच्॥ एजिह्वद्विमात्र

एव॥ तात्परत्वात्॥ तेन कृष्णैकत्वमित्यत्र त्रिमात्रेण॥ एवमुत्तरसूत्रेपि॥ तेन गंगोदकमित्यादौ

त्रिमात्रेण॥ भूवादयो धातवः॥ भूश्च वाश्च्या तद्वंद्वः॥ आदिशब्दयोर्व्यवस्थाप्रकारवाचिनो

रेकशेषः भूवौ आदी येषामिति बहुव्रीहिः॥ भूप्रभृतयो वा सदृशाः॥ सादृश्यं च क्रियावाच

कत्वेनेत्यभिप्रेत्याह॥ क्रियावाचिन इति॥ क्रियावाचिनः किम्॥ याः पश्यसि सीत्यादौ धातु

(९)

को॰ टी॰ त्वंमा भूत्॥ सान्निहितास्मिन् आनो धानोरितिस्यात्॥ भ्वादयः किम्॥ हिरुक् पृथक् इत्यादयमपी भावा म॰ मा
॥८॥ नांशिश्यइति भावार्थतिडं तस्य च मा भूत्॥ स्तं भ्वादीनां पुरिकरणेन सोत्राणां धातुसंज्ञाप्यते॥ चु
डुंपादीनां तु बहुलमेतान्निदर्शनामिति गणसूत्रेण संग्रहः॥ चादयः॥ अद्रव्यार्थाः किं
पशुः॥ लिंगसंख्यान्वितं द्रव्यं॥ इदमुत्स्योदेव॥ ये धंनयंतिपशुमन्यमानाः॥ पशु इ
तिसम्यगर्थे॥ निरदुस इति सांतौ॥ निसस्तपतावितिनिर्देशात्॥ अयोगवाह
नामविशेषेणेतिप्रकरणानिष्कंतदुष्कृतमित्युदाहृत्य इदुदुपधस्य सकारस्य यो विस
र्जनीय इति भाष्योक्तेश्च॥ उपसर्गस्यायतावितिसूत्रे वामनोप्येवं॥ निरः कुषः स्फुरो
रधिकरण इति निर्देशात् रेफांतावपीतितत्रैव सूत्रे हरदत्तः॥ इति संज्ञाप्रकरणं॥
इको गुणवृद्धीति॥ गुणवृद्धिशब्दाभ्यामिति॥ एतच्च पूर्वसूत्रात् लभ्यते॥ गुणवृद्धिपदे अ ॥८॥

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

नुवर्त्तसगुणोवृद्धिरितिपेगुणवृद्धीतियोजनयालभ्यते॥ तेनेहन॥ दिवओत्॥ द्योःत्यदादी
नामः॥ सइमं॥ षष्ठ्यंतमिति॥ सूत्रेषष्ठ्यंतस्यानुकरणाच्छब्दस्वरूपपरतयानपुंसकात्सोर्लु
कइति॥ पदमिति॥ तच्चसंभवतिसामानाधिकरण्येइगंतस्यांगस्येत्यादि क्रमेणसंबध्य
ते॥ मिदेर्गुणः॥ मृजेर्वृद्धिरित्यादौतुसामानाधिकरण्यासंभवान्मिदिमृज्योरवयवस्य
कइतिसंबध्यते॥ यत्तुइकएवस्थानेसूतइतिप्राचामाख्यातंयच्चतद्धीकोवृत्तोक्रमानि
यमप्रसंगोनियमार्थमिदमित्यादितत्सर्वंभाष्यविरोधादुपेक्ष्यम्॥ तच्छेषपक्षंदूषयित्वाप
दोपस्थितिपक्षस्यैवभाष्येसमर्थितत्वात् इत्याहुः॥ तच्छेषपक्षेपिदूषणोद्धारस्तुशब्द
कौस्तुभेस्पष्टीकृतोस्माभिः॥ अचांमध्यइति॥ यत्तुप्राचोक्तं अंत्यादचःपरइतिनि
न्न॥ शेमुचादीनामित्यादौ अंत्यस्याचोसंभवात्॥ तस्यैवान्तावयवइति॥ तेनत्र

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

को॰ टी॰ पुणीत्यादेो अंगस्यनांतत्वेनदीर्घः सिद्धः॥ परादिवत्वेनसासिध्येत्॥ अभक्तत्वेनुवहूंलिह म॰ मा॰
॥१॥ इत्यत्रवहूभ्रंलिहइतिरवाशी अरुर्द्विषदिति मुमि मोनुस्वारो नस्यात्॥ अपदांतत्वात्
यत्वभक्तत्वेत्रपुणीत्यादौ दीर्घो नस्यादितिमतादिग्रहणंस्यादिनुमर्थमिति अंगसंज्ञा
सूत्रस्थवार्तिकेनेव दूषितप्रायम्॥ स्थानेयोगेति॥ स्थानेनयोगोस्याइति विग्रहः॥ नि
पातोदृत्वं॥ अनेकविधमिति॥ स्थाना र्थगुणप्रमाणकृतेइत्यर्थः॥ बलीयइत्यर्थः॥ तेनचे
तास्त्रोतेत्यत्र प्रमाणतः आंतर्यवानकारोनानिभावः॥ तस्मिन्निति॥ सप्तम्यंतानुकरणं
॥ निःशब्दोनेरंतर्यपरः॥ द्विशिरुच्चारणक्रियः॥ अचियुणित्यत्रव्यवहितेऽव्यवहितेच
प्राप्ते अव्यवहितएवेति॥ पूर्वस्य परस्यप्राप्ते पूर्वस्यैवेतिनियम्यते॥ अव्यवहितस्य
तितुफलितार्थकथनं॥ परस्ययदिति॥ तस्मादित्यत्रपरस्योदरितुनसूत्रितम्॥ आद ॥१॥

...Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai...

(10A)

रित्यंशस्यसर्वादेशबाधकत्वापत्तेः॥ सिद्धांतेतुपरत्वात्सर्वादेशत्वंबाधकमित्युत्तरपदेमे
ववक्ष्यते॥ अनेकाल्॥ शितउदाहरणंइदमइदः॥ इतः॥ यत्तुवृत्तिकृताजश्शसोःशिरित्यु
दाहृतं॥ तन्न॥ सर्वादेशतायाःप्राक्शित्वस्यैवाभावात्॥ तत्राहिडाणलोरिवानुपूर्व्यादनेका
ल्त्वेनैवसर्वादेशत्वमितिसिद्धांतः॥ इत्यादावित्ति॥ आदिशब्देनातोभिस्ऐस्इतिग्रहणेन॥
परत्वादित्ति॥ अतएवादेःपरस्येतिसूत्रेपिनेत्क्रमम्॥ उत्तरस्येत्यंशस्तुओशेसोरपिप्रव
र्तते एवेति॥ यत्तुप्राचाओदितिसूत्रंविवृत्वता पंचमीनिर्देशेनेत्याद्युक्तम् तदसं
बद्धमितिस्पष्टमेव॥ परानित्येति॥ परानित्यंयथा॥ तुदति॥ रुणद्धि॥ परमपित्वद्रूपध
गुणंलाक्षश्नमो॥ तथारधेर्णिच्॥ रंधयति॥ परामप्युपधावृद्धिंबाधित्वारधिजभोरिति
नुम्॥ नचसोपिशब्दांतरप्राप्त्यानित्यइतिवाच्यम्॥ कृताकृतप्रसंगेणापिक्वचिन्नि

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com